Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 1 | ISSN : 2581- 6306

# भोजराजस्य परिचयः



संजयकुमारः
शोधच्छात्रः साहित्यविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीरणवीरपरिसरः जम्मूः।

**सारांशः** – भोजराजः केवलं वीरसम्राटराजा एव नासीत् सःप्रायः पञ्चशतं विदुषां कविनां आश्रयदाता स्वयं च सर्वविद्यानिष्णातः कविर्विद्वान् लेखकः आसीत् । श्रूयते तेन 84 भवनानि राजप्रासादानि निर्मितानि एवमेव 84 ग्रन्थानां प्रणयनमपि चकार । अत्र तेन लिखित ग्रंन्थाणां सूचीमात्रं प्रदीयते ।

**मुख्यशब्दः**– भोजराजः, सन्तः, वीरः, वीरसम्राटराजा, लिखित, ग्रंन्थाणां।

प्राचीनकालात् भारतदेशोऽयं स्वगौरवपूर्णेतिहासकारणात् संसारे "स्वर्ण विहगः" इति अभिधीयते स्म । अत्रत्याः ऋषिमुनयः स्व ज्ञानबलेन, तपो बलेन नूतनवैज्ञानिकानुसधानैः करुणया प्रजापालनेन स्व पराक्रमेण धर्मरक्षणेन , विद्याकेन्द्राणां प्रोत्साहनेन विद्वद्भ्यः आश्रयप्रदानेन परिपोषणेन जनप्रियाः कीर्तिवन्तः सन्तः जगद्वन्द्याः संजाताः । जनप्रियपुण्यशालीराज्ञां एकादीर्घापरम्परा विद्यते भारतेतिहासे ।

एतादृशेषु पुण्यशाली नृपेषु कविनां गुणीनामाश्रयदाता स्वयं सरस्वतीकृपापूर्णः आसमन्तात् नवतिग्रंथाणां प्रणेता परमारवंशीयो भोजराजोऽभूत् ।

दशम्यां ईश्वीयशताब्द्यां जनश्रुतिरियं प्रचलितासीत् भारते परमारवंशस्य आदिपुरुषस्य आविर्भावः अरावली पर्वते एकस्मात् अग्निकुण्डात् सञ्जाता । भोजनृपस्य वंशपरमारवंशो वर्तते । 672-995 ईश्वीये संजातस्य वाक्यतिमुञ्जस्य तथा तस्योत्तरवर्तिनः सिन्धुराजस्य समकालिकः सुप्रथितः कविः पद्मगुप्तः स्वकीये काव्ये नवसाहसाङ्कचरिते लिखति यत् ।

अथर्ववेदस्य मूलसमीक्षकः वशिष्ठः रघुकुलस्यकुलपुरोहितः बभूव। अस्य ऋषेः आश्रमे कामधेनुः पालितापोषिता रक्षिता आसीत्। एकदाविश्वामित्रः कामधेनोः अपहरणमकरोत्। अस्मात् कारणात् वशिष्ठऋषिः कोपाविष्टो संजातः। सः अथर्वमंत्रैः यज्ञे अग्नि जुहोत। तस्मात् अग्निकुण्डात् एकः धनुर्धरः काञ्चन कवचधारी मुकुटधारी वीरः समजायत। अग्निकुण्डात्जातः असौ वीरः स्वपराक्रमेण विश्वामित्रात् कामंधेनुं स्वतंत्रां अकारयत्। वशिष्ठस्तस्यवीरस्य पराक्रमेण संतुष्टो प्रसन्नश्च भूत्वा परमारः ( शत्रुनाशकः ) इति अभिधानेन पृथ्वीमण्डले तं वीरं भूपं चकार। अस्मात् वीरपरमाराद् यत् कुलं समारब्धम्। अस्य वंशस्य राजानः सद्वृत्तयः सन्तः लोके सर्वत्रसमादृताः सञ्जाताः। [1]

राजस्थाने चारणकथासु वर्णितं यत्-कश्चिद् मुनिगुणः ध्यानलीनः भक्तिभावपरिप्लुतः समययापनं अकरोत्।

दैत्याः सदा दुष्टकर्मरताः अकारणद्रोहशीलाः क्रुद्धाः ऋषिमुनिभ्यः असूयन्ति स्म। तदा वैज्ञानिकाः ऋषयः शक्तिप्राप्त्यर्थं यज्ञ कुण्डं न्यार्मापयन्। किन्तु दैत्याः यज्ञात् पूर्वमेव रक्तमज्जास्थिमां- सश्रुरीषादिभिः पदार्थैः तान कुण्डान् दूषितान् कृतवन्तः यज्ञायोजने बाधामुपस्थापितवन्तः। एतदर्थं ऋषयः ब्राह्मणाः स्वयज्ञसुरक्षायै महादेवं शंकरं प्रार्थयामासुः शंकरस्तु अशुतोषः भवति। महादेव- कृपया यज्ञवेदितः एकः वीरपुरुषः समजायत सः युद्धनिपुणः आसीदतः पुरोहिताः आचार्याः तं यज्ञशालायाः प्रवेशद्वारि रक्षक प्रतिहारि रुपेण स्थापितवन्तः। तस्य नाम पृथ्वीधरः इति घोषितवन्तः। अस्यैव पृथ्वीधरस्य संज्ञा कालान्तरे परिहारोऽभवत्। [2]

आइने अकबरीति ख्याते ग्रन्थेऽपि परमारवंशस्य उत्पत्तिः अग्नेः अभिमता। किन्तु अत्र परमाराणा- मुत्पत्तिविषये एका भिन्ना एव कथा संकेतिता। तत्रोक्तं यत् –

" दैवी संवत्सरस्य चत्वारिंशत्तमे वर्षे (761 ईश्वी पूर्वं ) महाबाहु संज्ञकः एकः ब्राह्मणः यज्ञशालायामग्निं प्रतिष्ठाप्य आहुतयः प्रारब्धवान्। मोक्षार्थिणः तस्मिन् यज्ञकुण्डे आहुतिं समर्पयन्तः तां पूजां प्रतिआकर्षिताः अभवन् अस्मात् पूजा कर्मणः बौद्धानुयायिनः शाङ्किताः सन्तः सासारिकं नृपं अस्य यज्ञकर्मणः उन्मूलनाय प्रार्थितवन्तः। राजाज्ञयायज्ञानुष्ठानमवरुद्धम्। अनेन क्षुब्धाः भक्ताः यज्ञोपासकाः यज्ञरक्षार्थं तथा च यः यज्ञनिरोधकर्तुः नाशकर्तुं

[1] नवसाहसाङ्कचरितं सर्ग 11 श्लोकः 74-76 पद्मगुप्तः

[2] टुँकृत एनालिसिस आँव राजस्थान सं हिस्ट्री कुक वाल्युं 1 पृष्ट 93 कनिंघम् वाल्यूम् 2 पृष्ट 255

समर्थो भवेत् तादृशं वीरं उत्पन्नं कर्तुं प्रार्थनां चक्रुः । सर्वनियन्तापरमेश्वरः अस्मात् हवनकुण्डात् एकं युद्धवीरं पुरुषं जनयामास अयं अग्नेः संजातः वीरपुरुषः स्व शौर्येण यज्ञानुष्ठानस्य सर्वान् विघ्नान् शीघ्रमेव निराकृतवान् । तस्य संज्ञा घंजी इति प्रदत्ता । अयं घंजी स्वदेशात् दक्षिणात् आगत्य मालवादेशे सिंहासनमधिरुढः । अस्य कुलस्य पंचमः नृपः पुन्नाज अभवत् । तस्य सुतः नासीत् । तस्मिन् कालकवलिते सचिवाः आमात्याः तस्योत्तराधिकारीत्वेन पोंवार इतिनामकं नियोजितवन्तः । एतदर्थं अस्यवंशस्य अभिधानं परमारेति विख्यातः [3] अस्य परमारवंशस्य शिलालेखेषु उत्पत्तिविषये यद्धुक्तमिति प्रमाणं प्रस्तुमः ।

उदयादित्यस्य ( 1072 ईश्वीये ) राज्यस्य उदयपुरप्रशस्ति इति प्रसिद्धः धारानगर्याः वंशस्य प्राचीनतमः उपलब्धः शिलालेखो वर्तते । अस्मिन् शिलालेखे परमारवंशस्य काल्पनिकोत्पत्तिर्लिखिता ।

अर्बुदाचलः यः हिमालयस्य पुत्रः वर्तते । अयं पश्चिमदिशि स्थितः यत्र तपस्वनीनां समाधिसिद्धिर्भवति । तत्र विश्वामित्रः बलात् वशिष्ठस्य कामधेनुं अपाहरत् । वशिष्ठऋषेः तपोबलेन यज्ञकुण्डादेको वीरः उत्पन्नः यः शत्रुवधं कृत्वा कामधेनुं विश्वामित्रात् पुनः प्राप्तवान् । तदा वशिष्ठः ऋषिः तं वीरं परमार इति नाम प्रदाय तं राज्ञामीश्वरं कृतवान् ।[4] इयमेव परमारवंशोत्पत्तिकथा अधोनिर्दिष्ट शिलालेखेषु समानरुपेण उल्लिखिता ।

1 नागपुरशिलालेखः ।[5]

2 पूर्णपलास्य वसन्तगढ शिलालेखः 1042 ई. तिथ्याङ्कितः ।[6]

3 आबूपर्वते अचलेश्वरमन्दिरस्या प्रकाशित शिलालेखः ।[7]

4 आबूपर्वते शिलालेखः प्रथमोद्वितीयश्च ।[8]

5 पाटनारायण शिलालेखः । [9]

---

[3] आइने अकबरी ब्लाकमनेन पेरेटेन च कृतांग्लानुवादः वाल्युम 2 पृष्ठ 214

[4] ए.ई. वाल्यूम 1 पृष्ठ 236

[5] ए.ई वाल्यूम 2 पृष्ट 11

[6] ए ई वाल्यूम9 पृष्ट 11

[7] ए.ई. वाल्यूम 8 पृष्ट 200

[8] ए.ई. वाल्यूम 47 पृष्ट 193

[9] ए.ई. वाल्यूम 45पृष्ट 27

6 परमार चामण्डराजस्य अर्थुना शिलालेखः ।[10]

7 आबुपर्वत शिलालेखः । [11]

एषां शिलालेखानां वर्णनं पूर्वतया अंशतया वा नवसाहसाङ्कचरितस्य वर्णनात् समानतामावहति । अस्मिन्नेव विख्याते परमारकुले नृपस्य भोजराजस्य जन्मअभवत् ।

भोजराजस्य परिचयः- मेरुतुङ्गः स्वप्रबंधचिंतामणिग्रन्थे उल्लेखयति यत्- वाक्पतिराजस्य पश्चात् भोजराजः मालवासिंहासनमधिरुढः । अस्मिन् प्रसङ्गे एकाकथा वर्णिता यद् भोजस्य जन्मान्तरं अस्य जन्मकुण्डली ज्योतिर्विद्भिः सिद्धा तत्र जातकस्य भाग्ये लिखितं यत् अयं जातकः गौडदेशे सदक्षिणापथे 55 वर्षाणि सप्तमासानि दिनत्रयं यावत् राज्यशासनं संभालयिष्यति । अनया ज्योतिर्विदां भोजभाग्यविषयक भविष्यवाण्यां वाक्पतिः स्वदेहांशजपुत्रस्य शान्तिपूर्णोत्तराधिकारं न दृष्टवा मम सुतः नृपो न भविता अतः  सः स्व विश्वासपात्र सैनिकानाहूयाज्ञापयद्यत् भोजस्य वधः अनुष्ठेयः ।वाक्यपतेः आज्ञापालनाय राजकुमारः भोजः वधस्थले समानीतः । तत्र भोजप्राणापहर्तुं नियुक्त सैनिकाः बालभोजं स्वेष्टदेवं स्मरणार्थं उक्तवन्तः ।

भोजस्तु सपद्येवस्वागुलिं विदार्य तत्र निःसृतरक्तेन एकस्मिन् पत्रे अलिखत् यत्-

" सत्ययुगालङ्कार स्वरूपः राजामान्धातागतः, रावणस्य शत्रुः राम चन्द्रः अद्य क्वयःमहासागरे सेतुं बबन्ध । अधुना यावत्  युदिष्टिरादयः अनेके नृपाः संजाताः इयं धरित्री केनापि सह न गता । किन्तु भो । राजान् इयं पृथ्वी नूनंत्वयासह याष्यति इति चिन्तये " इदं पत्रं श्लोकरुपेणलिखित्वा सैनिकान् प्रार्थयत् यत् एनं पत्रं राजानं प्रापयन्तु पश्चान्मां मारयन्तु । तथा कृते राजा वाक्यपति बालभोजलिखितपद्यं पठित्वा अतीव बुद्धः स्व निर्णये क्षुब्धः पश्चातपपूर्णः सन् सपदि राजकुमारं पुनरानयननायाज्ञापयत् । स्नेहेन तमालिङ्ग्य तस्य स्वागतं विधाय गौरवास्वपदं यौवराज्यं प्रादात् । [12] इयमेव कथा आइने अकबरी ग्रन्थे किंचित्परिवर्तनेन वर्णिता " कदाचित् अशुद्ध

[10] ए.ई वाल्यूम 14 पृष्ट295

[11] ए.ई. वाल्यूम 9 पृष्ट 148

[12] प्रबन्धचिंतामणि पृष्ठ 22 मेरुतुङ्गः

जन्मकुण्डल्याः फलादेशानुसारं सम्बन्धिनः तं मरणार्थं अरक्षित स्थाने त्यक्तवन्तः किन्तु यथार्थे ज्ञाते बालभोजः पुनः परिवारजनानां स्नेहपात्रं अभूत् " ।[13]

**भोजस्य जन्म बाल्यकालश्च-** भोजप्रबन्धे भोजस्य जन्मविषये विचित्रा जनश्रुतिकथा संकेतिता धाराराज्ये सिंधुलनामराजा चिरं प्रजामपालयत् । तस्य वृद्धावस्थायां सुतः समुत्पन्नः, भोजराजः सिंधुलस्य वा सिंधुराजस्य पुत्रः अभूत् । भोजप्रबन्धे अस्यवर्णनमेवं मिलति "यदा भोजः पाञ्चवार्षिको जातः तदास्य पितात्मनः जरां ज्ञात्वा अनुजं मुञ्जं महाबलमालोक्य पुत्रं च बालं वीक्ष्य विचारयामास यदाहं राजलक्ष्मीभार धारणसमर्थं सोदरमपहाय राज्यं पुत्राय प्रयच्छामि तदा लोकापवादः । अथवा बालं मे पुत्रं मुञ्चो राज्यलोभाद् विषादिना मारयिष्याति । तदा दत्तमपि राज्यं वृथा । पुत्रहानिर्वंशोच्छेदश्च "[14] इति विचारं कृत्वा राज्यं मुञ्चाय कृत्वा तस्यक्रोडे भोजराजं दत्तवान् जन्म पत्रिकां ब्राह्मणं पृच्छ इति तदा मुञ्जः ज्योतिर्विदं आहूय भोजस्य जन्म पत्रिकां निर्माय राजाज्ञया ज्योतिर्विदः आह-

**"पञ्चपञ्चाशत् वर्षाणि सप्तमासदिन त्रयम् ।**

**भोजराजेन भोक्तव्यः सगोडोदक्षिणापथम् ।। [15]**

ज्योतिर्विदः भविष्यवाणीं ज्ञात्वा निशि नृपः मुञ्जः एकाकी अचिंतयत् यदि राजा भोजो भविष्यति तथाहं तु जीवन्नपि मृतसमो भविष्यामि एवं विचार्य प्रभाते बङ्गदेशेश्वरं महाबलं वत्सराजं एकान्ते आकार्य अवदत् - "त्वया भोजः भुवनेश्वरी विपिने हन्तव्यः प्रथमयामे निशायाः निरश्चान्ते पुरमानेतव्यमिति "।[16]

मुञ्जेनासहमतोऽपि वत्सराजः भोजं विद्यालयात् आहूय बालं रथमारुह्य खड्गं कोशाद् निष्काश्य महामाया मंदिरे आगतः । तदा वत्सराजः बालभोजं प्राह- ज्योतिषशास्त्रविज्ञेन केनापि ब्राह्मणेन तवराज्य प्राप्तियोगं प्रकटिते तव वधाय नृपः मुञ्जः मां आदिष्टवान् अतः त्वया मृत्योः पूर्वं ईष्टदेवः स्मर्तव्यः । ततो वृक्षस्य पुत्रंआदाय एकं

---

[13] आदूने अकबरी वाल्यूम 2 पृष्ट 216- 217

[14] भोजप्रबन्धः पृष्ठ 1

[15] भोजप्रबंध पृष्ठ 9 श्लोक6

[16] भोजप्रबंन्ध पृष्ठ 13

पुटीकृत्य जङ्घां छुरिकया छित्वा तत्र पुटके रक्तमारोप्य एकस्मिन् पत्रेकञ्चनश्लोकं लिखित्वा वत्समाह। महाभाग एतत् पत्रं नृपाय दातव्यम् त्वमपि राजाज्ञां विधेहीति। मुखश्रियमावलोक्य प्राह।[17]

स्वानुजेन प्रबोधितः वत्सराजः बालभोजं नमस्कृत्य क्षमायाचनां विद्याय भोजं गोपायितं सुरक्षितं विधाय कृत्रिमचित्रकारैः भोजष्तक प्रतिकृतिं कारयित्वा मुञ्जं समर्पयन् अवादीत् मया भवतः आज्ञा पालिता। मुञ्जः भोजवधं विज्ञाय पृष्टवान् मृत्युसमये तवखण्ड्गमवलोक्य भोजः किमुवाचा-तदावत्सराजः भोजप्रदत्तपत्रं मुंजं प्रादात् । राजामुञ्जः प्रदीपप्रकाशे तं पत्रं वाचयति पत्रे श्लोकोऽयमङ्कितम् –

**मांधाता च महीपतिः कृतयुगालङ्कार भूतोगतः।**

**सेतुर्येन महादधौ विरचितः क्वासौ दशास्यांतकः॥**

**अन्ये चापियुधिष्टिरप्रभृतयो याता दिवंभूपते।**

**नैकेनापि समंगता वसुमती नूनं त्वयायास्यति॥**[18]

भोजस्यैनं पत्रं पठित्वा नृप- स्व दोषं अवबुद्धय संज्ञाहीनः जातः प्रायश्चितं कृर्तुं ब्राह्मणं आकारयामास । तदा बुद्धिसागरः मंत्री तदोक्तवान्यत् वत्सराजोऽपि वधकारकः प्रायश्चितार्हः । तदा वत्सराजसत्यं उद्धाटितवान् यन्मया भोजः न हतः तदा बुद्धिसागरः मिथ्याप्रचारं कृतवान् यत् कस्यचित् योगिनः तपोबलेन भोजः पुनरुज्जीवितः तदा मुञ्जेन तस्मै राज्यं प्रदत्तम् यथोक्तम् –

"योगिना भोजो जीवति इति प्रथा च समभीत। ततो गजेन्द्रारुढो वन्दिभिःस्तूयमानो भेरीमृदङ्गधोषैर्जगद्बधिरीकुर्वन् पौरमात्य परपिवृत्तो भोजराजो राजभवनमगात्। ततः सन्तुष्टो राजा राजसिंहासने तस्मिन्निवेशयित्वा छत्रचामराभ्यां भूषयित्वा तस्मै राज्यं ददौ। निजपुत्रेभ्यः प्रत्येकं एकैकं ग्रामं दत्त्वापरमप्रेमास्पदं जयन्तं भोजनिकाशे निवेशयामास। ततो मुञ्जोऽपि निजपट्टराज्ञिभिः सहतपोवनभूमिं गत्वा परं तपस्तेपे । ततोभोजभूपालः देवब्राह्मण प्रसादाद्राज्यं पालयामास " [19] भोजचरिते इयं कथा किंचित् परिवर्तनेन मिलति किन्तु भोजप्रणीत श्लोकद्वयं समानरुपेण वर्तते।

---

[17] भोजप्रबंध पृष्ठ 24

[18] भोजप्रबंध पृष्ठ27 श्लोक 38

[19] भोजप्रबन्द पृष्ठ 23

**भोजराजस्य व्यक्तित्वम्** – भोजशब्दस्य व्युत्पत्तिः मिहिरभोजस्य ग्वालियर प्रशस्तौ प्राप्यते । आक्रम्य भूभृतां भोक्ता यः प्रभुर्भोज इत्यभात् । अर्थात् भूभृतेषु पर्वतेषु वा आक्रमणं कृत्वा यः तेषां राज्यं तेषां सेवां च उपभुक्तवान् स प्रभुः स्वामि भोजः इतीरितः । श्रृंगारमंजरी कथायां भोजः स्वकीयव्यक्तित्वस्य विशिष्टं परिचयं निर्दिशति अलङ्कृत शैल्यामत्र भोजस्य विशेषताः निर्दिष्टाः ता- अन्य अन्तः बाह्यसाक्ष्यैरपि समर्थिताः भवन्ति । यथा – "कनककान्तिछुरितमरकतप्रभाभिरानदेहः" [20] अर्थात् भोजस्य व्यक्तित्वं मनोहारि स्वयंप्रभासमावेसेनयथा मरकतं प्रभासितम् भवति तथा भोजदेहं आसीत् ।" ससो कुम्भोजो रक्खडकणयछिकडारदेहवित्यारो " [21] भोजस्य उपाधि अवनिकूर्मः आसीत् . भुजबल भीमः भीमपराक्रमः सदृशविरूदैरपि एतत् तत्यं सिद्धयति ।
निजभुजोदलिदुर्मदरिपुः -⁻ तथा लावण्यपीयूषसलिल--[22]

तथा- सतताविष्कृतसुदर्शनोऽपि दुर्दर्शनः –[23] सः आकृत्या सुंदरः किन्तु पराक्रमकारणात् सुदर्शनोऽपि दुर्दर्शनः आसीत् । हरादृहासविशदकान्ति सम्परः अभूत् प्रसवभूमिः सः धर्मस्य प्रसवः आसीत् । उक्तं यता- "प्रभवोधर्मस्य" [24] तस्याः कमनीया कृतिं विलोक्यैव मानिनः मानं त्यजन्ति । कामिनीषुकाम कामभाव,जागर्ति यथा "शौरिरिवमदन जनकः "[25] सः विविधपुरुषेषु आसक्तां लक्ष्मी सः एकत्रैव बबन्ध यथा-
"चपलराजलक्ष्मीकरेणुकालानपृथु भुजस्तम्भ" [26] भोजराजविचारानुसारं जीवने नीतेः आयुर्वेदस्य धर्मशास्त्रस्य प्रतिदिनं अनुसरणं कर्तव्यम् । स्वकीय चारुचर्यानामकेग्रन्थे एतादृश जीवनयापनस्य संदेशं ददाति –

**सुनीतिशास्त्र सद्वैद्यधर्मशास्त्रानुसारतः ।**

**विरच्यते चारुचर्या भोजभूपेन धीमता ।।[27]**

---

[20] श्रृंगारमंजरीकथा पृष्ठ 8

[21] अवनिकूर्मशतकः

[22] श्रृगारकथा पृष्ठ 8

[23] श्रृंगार कथा पृष्ठः 8

[24] श्रृंगारकथामंजरी पृष्ठ 9,10

[25] श्रृगारमंजरी कथा पृष्ठ 8

[26] श्रृंगारमंजरी कथा पृष्ठ 8

भोजराजः सुचरित्रवान् शीलगुण सम्पन्नः आसीत्। तस्य विचारानुसारं

**"कुरुपीणीं कुशीलां च विधवां च पर स्त्रियम्।**

**जात्युत्कृष्टां हीनां च पुत्र मित्रनृपस्त्रियः।।**

**त्यजेदेदास कुलोद्भूतां कृशां स्त्रीं कन्यकां तथा।**

**तारुण्यरमणीं गत्वा वृद्धोऽपितरुणायते।।**

सः सर्वक्षुद्रक्षत्रियाणां भार्गवसमं उन्मूलनं कृतवान् यथोक्तं –भार्गव इव "निर्मलिताखिलक्षुद्रक्षत्रियः "[28] सः ब्रह्मक्षत्रिय कुलीनः आसीत् यथोक्तम्-

**ब्रह्मक्षत्रकुलीनः प्रलीनसामन्तचक्रनुतचरणः।**

**सकलसुकृतैक मुंजः श्रीमान् मुजाश्चिरं जयतु।।[29]**

तस्य पूर्वजः उपेन्द्रराजोऽपि द्विजवर्गरत्नः उक्तः "उपेन्द्रराजोद्विजवर्गरत्नं शौर्यार्जितोतुंग नृपत्वमानः "[30] डाँ. दशरथशर्मा स्वाभिमतं प्रकटयति-

" अस्मिनभिमते सारः प्रतीयते यत् परमाराः विद्वांसाः वीराश्चासन् "[31] एवं प्रकारेण भोजस्य भुजयोः वीरता मष्तिष्के ज्ञानं करे दानं हृदये उदारता सच्चारित्र्यं चासीत्।

**भोजराजस्य कालः** – नृपेन्द्रश्चक्रवर्तीसम्राट् भोजराजः इतिहासप्रसिद्धः महापुरुषः कविर्लेखकः आसीत्। तस्य विषये संप्रति बहुविध प्रमाणानि मिलन्ति तेन लिखितग्रन्थाः , शिलालेखाः भग्नावशेषानि तेन निर्मितभवनानि। एभिः प्रमाणैः तस्य कालनिर्धारणं न दुष्करम्। यथार्थतः तस्यकालस्तु पूर्वमेव निर्धारितः। विवादस्य विषयस्तस्य जन्मनः देहान्तस्य च तिथिः वर्तते। भोजस्य दानपत्रेषु एकं पत्रं 1076 संवत्सरस्य च प्राप्यते। राजतरङ्गिण्यां कल्हणेन तस्य काल विषये उल्लेखः कृतः। यथा-

---

[27] चारुचर्या श्लोक प्रथम भोजराजः

[28] श्रृंगारमंजरीकथा पृष्ठ 9

[29] हलायुध पिङ्गल सूत्रवृत्ति तथा रेड राजाभोज पृष्ठ 7

[30] उदयपुरप्रशस्ति श्लोक 7ए.इ. पृष्ठ234

[31] पंरमारवंशदर्पण पृष्ठ 57 डाँ. दशरथ शर्मा

**स च भोजनरेन्द्रश्च दानोत्कर्षेण विश्रुतौ ।**

**सूरि तस्मिन्क्षणे तुल्यं द्वावस्तां कविबान्धवौ ।।[32]**

अत्र सः सर्वनामपदं काश्मीरादिपतेः अनन्तराजस्य कृते प्रयुक्तम् । एषः अनन्तराजः एकादशशतकदेशीयः आसीत् अतः भोजस्य समयोऽपि एकादशशतके ईश्वीये आसीत् ।प्रो. सुशीलकुमार महोदयैरपि पुष्टप्रमाणैः भोजस्य कालः 1010-1055 ईश्वीय वर्षः निर्धारितः ।

प्रो. राघवन् भोजस्य राज्याभिषेकं 1010 ईश्वीये देहावसानं च 1062 ईश्वीये स्वकीये स्वीचकार । एवं प्रकारेण इतिहासे प्रसिद्धस्य चर्चितव्यक्तित्वस्य कालनिर्धारणं अनुमानाधारेण इतस्ततः कर्तुं न युज्यते । वस्तुतः तस्य समयस्तु ईशाया- एकादशशतकं निश्चितं किन्तु तस्य जन्मराज्याभिषेकमृदीनां विषये सुनिश्चिताः तिथि र्न ज्ञायते ।

**भोजराजस्य रचना संसारः-**

भोजराजः केवलं वीरसम्राटराजा एव नासीत् सःप्रायः पञ्चशतं विदुषां कविनां आश्रयदाता स्वयं च सर्वविद्यानिष्णातः कविर्विद्वान् लेखकः आसीत् । श्रूयते तेन 84 भवनानि राजप्रासादानि निर्मितानि एवमेव 84 ग्रन्थानां प्रणयनमपि चकार । अत्र तेन लिखित ग्रंन्थाणां सूचीमात्रं प्रदीयते ।

1. साहित्यशास्त्रम्-

    1. सरस्वतीकण्ठाभरणम्

    2. श्रृङ्गारप्रकाशः

2. साहित्यकाव्यग्रन्थाः-

3. चम्पूरामायणम्

4. श्रृङ्गारमञ्जरीकथा

5. अवनिकूर्मशतम् कोदण्डकाव्यम् ( केषाञ्चनानां मते इयं कृति भोजकृतानास्ति ।)

6. सुभाषितप्रबन्धः

---

[32] राजतरङ्गिणी कल्हणः

7. विद्याविनोदः

8. शालिकथा

9. कालिविजय

10. चारुचर्या

11. चाणक्यराजनीतिशास्त्रम् अथवा चाणक्यमाणिक्यम्

12 वाग्देवीस्तुतिः

3 व्याकरणम् –

13 सरस्वतीकण्ठाभरणम्

14 प्राकृतव्याकरणम्

4 कोष

15 नाममालिका

16. अनेकार्थकोषः

17. अमरव्याख्या

5 सङ्गीतशास्त्रम्-

18 सङ्गीतप्रकाशः

6. इतिहासे

19. संजीवनी

7. दर्शनशास्त्रम्-

20. न्यायवार्तिकानि

21. तत्त्वप्रकाशः

22 सिद्धान्तसंग्रहः

23. सिद्धान्तास्पद्धतिः

24. राजमार्तण्डयोगसूत्रवृत्तिः

25. राजमार्तण्डः ( वेदान्तदर्शन )

26. शिवतत्वरत्नकलिका ( शिवतत्वप्रकाशिका )

27. तत्त्वचन्द्रिका

8. ज्योतिषशास्त्रे-

28. राजमार्तण्डः

29. राजमृगाङ्कः

30. विद्वज्जनवल्लभप्रश्नज्ञानम् ( प्रश्नचिन्तामणिः वी प्रश्नचूडामणिः )

31. भीमपराक्रमः

32. प्रश्नकेरली

33. आदित्यप्रतापसिद्धान्तः

34.भुजबलनिबन्धः थवा भुजबलभीमः

35. ज्योतिः सागरः अथवा ज्योतिः सागरसारः

36. रत्नकोषः

37. भोजदेवसारसंग्रहः अथवा शब्दप्रबोधः ।

38. ग्रहभाष्यम्

39. भोजसामुद्रिकम् अथवा हस्तसामुद्रिकम्

40. रमलामृतम्

9. धर्मशास्त्रम्

41. पूर्तमार्तण्डः

42. व्यवहारसमुच्चयः

43. व्यवहारमञ्जरी

44. सिद्धान्तसारपद्धतिः

45. विविधविद्याविचारचतुरा

46. भूपालकृतय समुच्चयः ( भूपालपद्धतिः )

47. राजमार्तण्डः

48. बृहदराजमार्तण्डः

49. रत्नामाला वा रत्नावली

50. कामधेनुः

51. धर्मप्रदीपः ( डाँ.पी.के. गोडे.अनुसारं अयं भोजः कच्छस्य आसीत् )

52. दुर्गोत्सवाधिकारः

53. प्रयोगपद्धतिरत्नावलिः

54. मनुस्मृतिभाष्यम्

10. राजनीतिशास्त्रम्-

55. नीतिनिबन्धनम् अथवा नीतिभजनम्

56. युक्तिकल्पतरुः

11. आयुर्वेदशास्त्रम्-

57. राजमृगाङ्कः

58. विश्रान्तिविद्याविनोद

59. आयुर्वेदसर्वस्वम्

60. राजमार्तण्डयोगसारसंग्रहः

61. शालिहोत्रम्

12. स्थापत्यकला-

62. समराङ्णसूत्रधारः

63. अभिनवभाष्यम्

64. पञ्चाशिका

65. मेघमाला

66. अयसद्भावविवृत्तिः